28-08-2020

classmate

Date

Page

उपशास्त्री II

संस्कृतसामान्यम् ।

अनिवार्यपत्रम् ।

प्रश्न :→ भवान् एकः निर्धनः छात्रः अस्ति । महाविद्यालयीयं शुल्कं प्रदातुं समर्थः नास्ति । अस्मिन् विषये प्रधानाचार्यपार्श्वे आवेदनं दद ।

उत्तरम् → सेवायाम्,

श्रीमन्तः प्रधानाचार्य महोदयाः !

रा० उ० सं० महाविद्यालयः सुखसेना, पूर्णियाँ ।

विषयः → महाविद्यालयशुल्कं प्रदातुं सन्दर्भे ।

महाशयः,

सविनयेन निवेदनमस्ति यदहं एकः निर्धनः छात्रः/छात्रा अस्मि । मम पिता एकः सीमान्तः कृषकः अस्ति । पितुः मासिकः आयः अत्यल्पः अस्ति यतोहि पारिवारिक व्ययः येन-केन-प्रकारेण चलति । अहं महाविद्यालयशुल्कं प्रदातुं समर्थः नास्मि ।

अतएव प्रार्थना अस्ति यत् मां महाविद्यालयशुल्क-प्रदानान्मुक्तं कुर्वन्तु ।

भवदीयः आज्ञाकारी छात्रः - नवनीतः
आज्ञाकारिणी छात्रा - आर्या
कक्षा - शास्त्री प्रथमवर्षः, उपशास्त्री द्वितीय वर्षः
क्रमांकः -

28-08-2020

28-08-2020

डॉ० निर्मल कुमार झा, (सं० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

28-08-2020

संस्कृत सामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । वाक्ये उपसर्गयुक्तक्रियापदस्य प्रयोग: ।

1. वह पराजित होता है → स: पराजयते ।
2. वह अध्ययन से पराजित होता है → स: अध्ययनात् पराजयते ।
3. मैं तुम्हारा उपकार करता हूँ → अहं तव उपकरोमि ।
4. यह बहुत उत्साहित होता है → अयं भृशम् उत्सहते ।
5. मोहन ऐसा अनुभव करता है → मोहन: इत्थम् अनुभवति ।
6. मैं तुमको जबाब देता हूँ → अहं त्वां प्रतिवदामि ।
7. व्याकरण के शिक्षक सूत्र की व्याख्या करते हैं → व्याकरणस्य शिक्षक: (सूत्रस्य व्याख्यां करोति) सूत्रं व्याकरोति ।
8. पुत्र माता की खुशामद (प्रार्थना) करता है → पुत्र: मातरम् अनुनयति ।
9. पर्यटक गुफाओं में घूमते हैं → पर्यटका: कन्दरासु (गुहासु) विचरन्ति ।
10. वह बेकार वस्तुओं को नष्ट करता है → स: उपयोगहीनानि वस्तूनि उत्सादयति ।
11. रमेश सरला के साथ विवाह करता है → रमेश: सरलया सह परिणयति उद्वहति वा ।
12. छात्र परीक्षा में सफल होने के लिए संकल्प करता है → छात्र: परीक्षायां सफलाय (सफलतां प्राप्तुम्) संकल्प: करोति (प्रतिजानाति वा) ।
13. पदाधिकारी (अफसर) घूस का तिरस्कार करता है → पदाधिकारी उत्कोचं तिरस्करोति अवजानाति वा ।
14. वह तुम्हें गाली देता है → स: त्वाम् अपवदति ।

28-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

28-08-2020

## शास्त्री

### सर्वेभ्यः छात्रेभ्यः हिताय ।

प्रश्नः → महाकविकालिदासस्य सामान्यं परिचयं लिखत ।

उत्तरम् → भारतवर्षस्य स्वर्गसमा वसुन्धरेयं धन्यास्ति यत्र कविकुलगुरुः कालिदास जन्म लेभे । अयं कविः कदाऽऽसीत्, कस्मिन् प्रान्ते अभवत्, कौ च पितरौ आस्ताम् ? इत्यादि प्रश्नानां दृढं प्रमाणम् अद्यापि न अवाप्यते । यत्किञ्चिद् वक्तुं शक्यते तदपि अनुमानाधीनमेव । किंवदन्त्या महाकविः जीवनारम्भे मेषचारकः महामूर्खश्चासीत् । काशीराजसदानन्दकन्यया विद्योतमया सह कपटरीत्या तस्य विवाहसम्बन्धः जातः । विद्योतमया तिरस्कृतः पश्चात् कालीशक्त्युपासनया कालिदासः वैदुष्यमवाप । अनावृतं कपाटं देहि, अस्ति कश्चिद्वाग्विशेषः इत्यादिनि वाक्यानि स्वात्मसन्तोषार्थमेव वयं स्वीकुर्मः ।

महाकवेः जन्मसमयः ईश्वीयपूर्वप्रथमशतकं सर्वाधिकः प्रामाणिकः । एष कविः विक्रमादित्यस्य सभायां नवरत्नेषु आसीत् इति समीचीनं प्रतिभाति । अस्य महाकवेः जन्मविषयेऽपि सर्वे विद्वांसः एकमताः न सन्ति । महद्गौरवस्य विषयोऽयं यत् सर्वे भारतीयाः स्वेषु-स्वेषु प्रान्तेषु महाकवेः जन्मस्थलं स्वीकुर्वन्ति तथापि उज्जयिनीप्रान्तभूमिः अस्य जन्मभूमिरेवाधिका प्रामाणिका ।

महाकविकालिदासस्य सप्तकृतयः सम्प्रत्युपलब्धाः सन्ति । महाकाव्येषु रघुवंशम् उनविंशतिसर्गात्मकम्, कुमारसम्भवम् सप्तदशसर्गात्मकम्, खण्डकाव्येषु मेघदूतम्, ऋतुसंहारञ्च नाटकेषु मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च वर्तन्ते । अस्य समस्ताः रचनाः प्रसादगुणयुक्ताः शृङ्गाररसयुक्ताः विविधालङ्कारछन्दयुक्ताः सन्ति । उपमाप्रयोगे कविः सिद्धहस्तः ।

28-08-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।